M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1570

Title: Yajnavalkya Smriti

1570

Incomplete

C	:	Yajnavalkya Sm.	: Title
:	:		: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
1570 :	:		: Remarks

श्रीगणेशायनमः योगीश्वरं याज्ञवल्क्यं संपूज्य मुनयो ब्रुवन् वर्णाश्रमेतराणां नो ब्रू
या॰स्मृ हि धर्मानशेषतः १ मिथिलास्थः स योगींद्रः क्षणं ध्यात्वाब्रवीन्मुनीन् यस्मिन्देशे मृगः
कृष्णस्तस्मिन्धर्मान्निबोधत २ पुराणन्यायमीमांसाधर्मशास्त्रांगमिश्रिताः वेदाः
१ स्थानानि विद्यानां धर्मस्य च चतुर्दश ३ मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोंगिराः
यमापस्तंबसंवर्ताः कात्यायनबृहस्पती ४ पराशरव्यासशंखलिखिता दक्षगौतमौ
शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ५ देशकालउपायेन द्रव्यं श्रद्धा समन्वितं पा
त्रे प्रदीयते यत्तत्सकलं धर्मलक्षणं ६ श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः सं
म्यक्संकल्पकः कामो धर्ममूलमिदं स्मृतं ७ इज्याचारदमाहिंसादानस्वाध्यायकर्मणां
अयं तु परमो धर्मो यद्योगेनात्मदर्शनं ८ चत्वारो वेदधर्मज्ञाः पर्षत्त्रैविद्यमेव वा स ब्रूते यं
स धर्मः स्यादेको वाध्यात्मवित्तमः ९ इत्युपोद्घातप्रकरणं ब्रह्मक्षत्रियविट्शूद्रा वर्णा
स्त्वाद्यास्त्रयो द्विजाः निषेकाद्याः श्मशानांतास्तेषां वै मंत्रतः क्रियाः १० गर्भाधानमृतौ
पुंसः सवनं स्पंदनात्पुरा षष्ठेष्टमे वा सीमंतो मास्येते जातकर्म च ११ अहन्येकादशे नाम च
तुर्थे मासि निष्क्रमः षष्ठेन्नप्राशनं मासि चूडा कार्या यथाकुलं १२ एवमेनः शमं याति बीजग

र्भसमुद्भवं तूष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समंत्रकः १३ गर्भाष्टमेष्टमे वाब्दे ब्रा
ह्मणस्योपनायनं राज्ञामेकादशे सैके विशामेके यथाकुलं १४ उपनीय गुरुः शिष्यं महाव्या
हृतिपूर्वकं वेदमध्यापयेदेनं शौचाचारांश्च शिक्षयेत् १५ दिवा संध्यासु कर्णस्थब्रह्म
सूत्र उदङ्मुखः कुर्यान्मूत्रपुरीषे च रात्रौ चेद्दक्षिणामुखः १६ गृहीतशिश्नश्चोत्थाय
मृद्भिरभ्युद्धृतैर्जलैः गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः १७ अंतर्जानु शुचौ देशे
उपविष्ट उदङ्मुखः प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् १८ कनिष्ठादे
शिन्यंगुष्ठमूलान्यग्रं करस्य च प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् १९ त्रिः प्रा
श्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बु
दैः २० हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः शुध्येरन् स्त्री च शूद्रश्च सकृत्स्पृष्टाभिरंततः २१
स्नानमब्दैवतैर्मंत्रैर्मार्जनं प्राणसंयमः सूर्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः २२ गाय
त्रीं शिरसा सार्धं जपेद्व्याहृतिपूर्विकां प्रतिप्रणवसंयुक्तां त्रिरयं प्राणसंयमः २३ प्राणानाय
म्य संप्रोक्ष्य तृचेनाब्दैवतेन तु जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् २४ संध्यां प्राक्
प्रातरेवं हि तिष्ठेदासूर्यदर्शनात् अग्निकार्यं ततः कुर्यात्संध्ययोरुभयोरपि २५ ततोभिवा

ध्येहं नामासावहमिति ब्रुवन्। गुरूंश्चैवाप्युपासीत स्वाध्यायार्थं समाहितः २६ आहूतश्चाप्यधीयीत
या. लब्धं चास्मै निवेदयेत्। हितं तस्याचरेन्नित्यं मनोवाक्कायकर्मभिः २७ कृतज्ञाद्रोहिमेधावी शु-
चिकल्यानसूयकाः अध्याप्या धर्मतः साधुशक्ताप्तज्ञानवित्तदाः दण्डाजिनोपवीतानि मेखलां
२ चैव धारयेत्। ब्राह्मणेषु चरेद्भैक्ष्यमनिन्द्येष्वात्मवृत्तये २८ आदिमध्यावसानेषु भवच्छब्दो-
पलक्षिता। ब्राह्मणक्षत्रियविशां भैक्ष्यचर्या यथाक्रमं ३० कृताग्निकार्यो भुञ्जीत वाग्यतो
गुर्वनुज्ञया। आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ३१ ब्रह्मचर्ये स्थितो नैकमन्नम-
द्यादनापदि। ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीडयन् ३२ मधुमांसाञ्जनोच्छिष्टशुक्त-
स्त्रीप्राणिहिंसनं भास्करालोकनाश्लीलपरिवादांश्च वर्जयेत् ३३ स गुरुर्यः क्रियाः कृत्वा वेदमस्मै
प्रयच्छति उपनीय ददद्वेदमाचार्यः स उदाहृतः ३४ एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते
एते मान्या यथापूर्वमेभ्यो माता गरीयसी ३५ प्रतिवेदं ब्रह्मचर्यं द्वादशाब्दानि पञ्च वा ग्रह-
णान्तिकमित्येके केशान्तश्चैव षोडशे ३६ आषोडशाद्द्वाविंशाच्चतुर्विंशाच्च वत्सरात् ब्रह्म- २
क्षत्रविशां काल औपनायनिकः परः ३७ अत ऊर्ध्वं पतन्त्येते सर्वधर्मबहिष्कृताः सावित्रीपति-
ता व्रात्या व्रात्यस्तोमादृते क्रतोः ३८ मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ब्राह्मणक्षत्रि-

कारकव्यवहारो हि शुद्धे वस्तुनि वीक्ष्यते शुद्धे वस्तुनि सिद्धे च कारकव्यापृतिस्तथा
काकोलूकनिशेवायं संसारोऽज्ञात्मवेदिनोः। या निशा सर्वभूतानामित्युवोच स्वयं
हरिः उक्त्वा तद्द्रोरगवद्विद्या किं करिष्यति। त्यज धर्ममधर्मं च उभे सत्यानृते त्यज
उभे सत्यानृते त्यक्त्वा येन त्यजसि तत्त्यज संसारमेव निःसारं दृष्ट्वा सारदिदृक्षया प्रव्र-
जन्त्यकृतोद्वाहाः परं वैराग्यमाश्रिताः। कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते तस्मात्
कर्म न कुर्वन्ति यतयः पारदर्शिनः इति शुकानुशासनं। यथादर्शतलप्रख्ये पश्यत्यात्मान-
मात्मनि॥ अन्योऽसावहमन्योऽस्मि [illegible] यथा परः अव्यक्तमूलप्रभवस्तस्यै-
वानुग्रहोत्थितः बुद्धिस्कन्धमयश्चैव इन्द्रियान्तरकोटरः महाभूतप्रशाखश्च विषयैः
पत्रवांस्तथा धर्माधर्मसुपुष्पश्च सुखदुःखफलोदयः आजीव्यः सर्वभूता-
नां ब्रह्मवृक्षः सनातनः एतद्ब्रह्मवनं चैव ब्रह्माचरति साक्षिवत्। एतच्छित्वा च भि-
त्त्वा च ज्ञानेन परमासिना। ततश्चात्मरतिं प्राप्य अत्र नावर्तते पुनः

ब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ५२ अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजां पंचमात्सप्तमादूर्ध्वं
या. मातृतः पितृतस्तथा। दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात् ५३ स्फीतादपि न संचारिरोग
३ दोषसमन्वितात् एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः यत्नात्परीक्षितः पुंस्त्वे युवा धीमा
न् जनप्रियः यदुच्यते द्विजातीनां शूद्राद्दारोपसंग्रहः नैतन्मम मतं यस्मात्तत्रात्मा जायते
स्वयं ५६ तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमं ब्राह्मणक्षत्रियविशां भार्या स्वा शूद्र
जन्मनः ५७ ब्राह्मो विवाह आहूय दीयते शक्त्यलंकृता। तज्जः पुनात्युभयतः पुरुषा
नेकविंशतिः ५८ यज्ञस्थ ऋत्विजे दैव आदायार्षस्तु गोद्वयं चतुर्दश प्रथमजः पुनात्युत्तरज
श्च षट् ५९ इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने स कायः पावयेत्तज्जः षट् षट् वंश्यः
सहात्मना ६० आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः राक्षसो युद्धहरणात् ३
पैशाचः कन्यकाछलात् ६१ चत्वारो ब्राह्मणस्याद्याः शस्तौ गांधर्वराक्षसौ राज्ञस्त
थासुरो वैश्यशूद्रे चांत्यस्तु गर्हितः पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया परं वैश्यः
प्र मादद्याद्वेदने चाग्रजन्मनः ६३ पिता पितामहो भ्राता सकुल्यो जननी तथा क
न्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ६४ अप्रयच्छन्समाप्नोति भ्रूणहत्यामृता

यविशस्तस्मादेतेद्विजास्मृताः ३९ यज्ञानांतपसांचैवशुभानांचैवकर्मणां वेदएवद्विजातीनां
निश्रेयसकरःपरः ४० मधुनापयसाचैवसदेवांस्तर्पयेद्द्विजः पितॄन्मधुघृताभ्यांचऋचोधीतेहियो
न्वहं ४१ यजूंषिशक्तितोधीतेयोन्वहंसघृतामृतैः प्रीणातिदेवानाज्येनमधुनाचपितॄंस्तथा ४२
सतुसोमघृतैर्देवांस्तर्पयेद्योन्वहंपठेत् सामानितृप्तिंकुर्याच्चपितॄणांमधुसर्पिषा ४३
येदस्तास्तर्पयेत्सन्न - - - - - - मेदसातर्पयेद्देवानथर्वांगिरसःपठेत् पितॄंश्चमधुसर्पि
र्भ्यामन्वहंशक्तितोद्विजः वाकोवाक्यंपुराणंचनाराशंसीश्चगाथिकाः इतिहासांस्तथा
विद्याःशक्त्याधीतेहियोन्वहं ४५ मांसक्षीरौदनमधुतर्पणंसदिवौकसां करोतितृप्तिंकु
र्याच्चपितॄणांमधुसर्पिषा ४६ तेतृप्तास्तर्पयंत्येनंसर्वकामफलैःशुभैः यंयंक्रतुमधीतेच
तस्यतस्याप्नुयात्फलं ४७ त्रिर्वित्तपूर्णपृथिवीदानस्यफलमश्नुते तपसश्चपरस्येहनि
त्यस्वाध्यायवान्द्विजः ४८ नैष्ठिकोब्रह्मचारीतुवसेदाचार्यसन्निधौ तदभावेस्यतनयेपत्न्यां
वैश्वानरेपिवा ४९ अनेनविधिनादेहंसाधयन्विजितेंद्रियः ब्रह्मलोकमवाप्नोतिनचेह
जायतेपुनः ५० इतिब्रह्मचारिप्रकरणं गुरवेतुवरंदत्वास्नायीततदनुज्ञया वेदव्र
तानिवापारंनीत्वाप्युभयमेववा ५१ अनन्यपूर्विकांकांतामसपिंडांयवीयसीं अविप्लुत